सिद्धकुंजिका स्तोत्रं

सिद्धकुंजिका स्तोत्रं

अस्य श्रीकुंजिकास्तोत्रमंत्रस्य सदाशिव ऋषिः, अनुष्टुप् छंदः, श्रीत्रिगुणात्मिका देवता, ॐ ऐं बीजं, ॐ ह्रीं शक्तिः, ॐ क्लीं कीलकं, मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः |

शिव उवाच |
शृणु देवि प्रवक्ष्यामि कुंजिकास्तोत्रमुत्तमं |
येन मंत्रप्रभावेण चंडीजापः शुभो भवेत् || 1 ||

न कवचं नार्गला स्तोत्रं कीलकं न रहस्यकं |
न सूक्तं नापि ध्यानं च न न्यासो न च वार्चनं || 2 ||

कुंजिकापाठमात्रेण दुर्गापाठफलं लभेत् |
अति गुह्यतरं देवि देवानामपि दुर्लभं || 3 ||

गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति |
मारणं मोहनं वश्यं स्तंभनोच्चाटनादिकं |
पाठमात्रेण संसिद्ध्येत् कुंजिकास्तोत्रमुत्तमं || 4 ||

अथ मंत्रः |
ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे |
ॐ ग्लौं हुं क्लीं जूं सः ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल
ऐं ह्रीं क्लीं चामुंडायै विच्चे ज्वल हं सं लं क्षं फट् स्वाहा || 5 ||
इति मंत्रः ||

नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दिनि |
नमः कैटभहारिण्यै नमस्ते महिषार्दिनि || 6 ||

नमस्ते शुंभहंत्र्यै च निशुंभासुरघातिनि |
जाग्रतं हि महादेवि जपं सिद्धं कुरुष्व मे || 7 ||

ऐंकारी सृष्टिरूपायै ह्रींकारी प्रतिपालिका |
क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते || 8 ||

चामुंडा चंडघाती च यैकारी वरदायिनी |
विच्चे चाऽभयदा नित्यं नमस्ते मंत्ररूपिणि || 9 ||

धां धीं धूं धूर्जटेः पत्नी वां वीं वूं वागधीश्वरी |
क्रां क्रीं क्रूं काळिका देवि शां शीं शूं मे शुभं कुरु || 10 ||

हुं हुं हुंकाररूपिण्यै जं जं जं जंभनादिनी |
भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नमः || 11 ||

अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं |
धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा || 12 ||

पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा |
सां सीं सूं सप्तशती देव्या मंत्रसिद्धिं कुरुष्व मे || 13 ||

कुंजिकायै नमो नमः |

इदं तु कुंजिकास्तोत्रं मंत्रजागर्तिहेतवे |
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति || 14 ||

यस्तु कुंजिकया देवि हीनां सप्तशतीं पठेत् |
न तस्य जायते सिद्धिररण्ये रोदनं यथा || 15 ||

इति श्रीरुद्रयामले गौरीतंत्रे शिवपार्वतीसंवादे कुंजिका स्तोत्रं |